# JOURNAL

OF THE

# ASIATIC SOCIETY OF BENGAL.

## VOL. LXVII.

PART I. (HISTORY, ANTIQUITIES, &c.)

NOS. I TO IV.—1898: (WITH 14 PLATES).

EDITED BY THE

HONORARY PHILOLOGICAL SECRETARY,

"It will flourish, if naturalists, chemists, antiquaries, philologers, and men of science in different parts of *Asia*, will commit their observations to writing, and send them to the Asiatic Society at Calcutta. It will languish, if such communications shall be long intermitted; and it will die away, if they shall entirely cease." SIR WM. JONES.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1898.

manors, messuages, lands, etc., for uses herein after expressed:—*viz*: £1000 yearly for use and support of Edward Stephenson, my son, during life and heirs ...... if my son die without issue ... then to Anthony Askew, ......

For these details I am indebted to Mr. F. A. Winder, who also tells me that Edward Stephenson built "Governor House," Keswick, and that a descendant of the family is still living in Paris at a place called "Governor's House." The following inscription is cut in stone on the chancel floor of Crosthwaite Parish Church.

"EDWARD STEPHENSON, ESQUIRE,
"late Governor
"of Bengal.
"Ob$^{t}$. Sep. 7, 1768.
"Ætat. 77."





*The discovery of a work by Āryadēva in Sanskrit.*—*By* MAHĀMAHŌPĀDHYĀYA HARAPRASĀD SHĀSTRĪ, *Professor of Sanskrit, Presidency College.*

[Read January, 1898.]

When in Nepal I paid a visit to His Excellency Dēva Shamshēr Jang Rāṇā Bahādur, Commander-in-Chief of the Nepal Army. At the interview were present a Hindu Paṇḍit and a Buddhist Bā̃ḍā. There was a collection of Manuscripts and I was asked by His Excellency if I knew anything of these Manuscripts. There were some volumes of the Çata-sāhasrikā-prajñā-pāramitā, a MS. of the Aṣṭasāhasrikā-prajñā-pāramitā written in the reign of Rāmapāla who is said to have been a king of Eastern Bengal and who reigned about the year 1000 A.D.; a MS. of a work on the influence of the heavenly bodies on human diseases. But there was a bundle of palm-leaves which I could not identify at first sight. It had no beginning and apparently no end. I solicited the permission of His Excellency to give me an opportunity of examining the MS., once more. It was therefore deposited with the Head Master of the Durbar School, Bābū Phaṇibhūṣaṇa Adhikārī. I called on him a few days later, examined the MS. very carefully and took a copy of it in Bengali. It was written in old Nēvārī and was in many places altogether obliterated. The first leaf was missing. There were eight leaves from 2 to 9 but the obverse side of the 7th was altogether illegible. There were altogether 125 verses from 6 to 131. Of the 6th verse only the last two caraṇas remain. Of the 3rd caraṇa the first letter was missing. That letter I had no difficulty in guessing. It was *Ma* because the second leaf begins with the letters *hāyāne.* After the 131st verse the following statement occurs.

कृतिरियं आर्य्यदेवपादानामिति ॥ स्वपरार्थहेतुना स्वात्र (?) इरितत्रेति
शुभं मये लिखितम् । यथात्मनः प्रियाः प्राणाः सर्व्वेषां प्राणिनां तथा ।

The name of the work is not given but it is stated in the colophon that it was the work of Āryadēva a name familiar to every reader of Buddhist Literature, and especially of the Siyuki. He was a disciple

of Nāgārjuna and one of those great men who helped the spread of the Mahāyāna doctrines of Buddhism. Beal says, " he had a great contempt for external forms of worship. 'A Spirit' he said, is 'Spiritnul.' We are not surprised to find therefore, that his teaching was of a mystical character." I find, the same thing exemplified before me. Thus he speaks of the bathing in the Ganges in my Manuscript:—

इत्थं अशुचिसम्भूतः पिण्डो ह्यशुचिपूरितः ।
कथं सन् तादृशः कायो गङ्गास्नानेन शुध्यति ॥ ६० ॥
न ह्यशुचिघटस्तोयैः क्षालितोऽपि पुनः पुनः ।
तद्वदशुचिसम्पूर्णः पिण्डोऽपि न विशुध्यति ॥ ६१ ॥
प्रतरन्नपि गङ्गायां नैव श्वा शुद्धिमर्हति ।
तस्मात् धर्म्मधियां पुंसां तीर्थस्नानं तु निष्फलम् ॥ ६२ ॥
धर्म्मो यदि भवेत् स्नानात् कैवर्त्तानां कृतार्थता ।
नक्तंदिवं प्रविष्टानां मत्स्यादीनान्तु का कथा ॥ ६३ ॥
पापक्षयोऽपि स्नानेन नैव स्यादिति निश्चयः ।
यतो रागादिबुद्धिस्तु दृश्यते तीर्थसेविनाम् ॥ ६४ ॥

Thus this lump (of flesh, meaning the human body) is produced by and is full of impure substances. How can it be purified by bathing in the Ganges? An impure waterpot though washed again and again by water, cannot be pure; so the lump full of impurities can never be pure. A dog swimming in the Ganges is not considered pure, therefore the bathing in holy places is absolutely useless. If bathing can confer merit the fishermen are very meritorious, not to speak of the fishes and others who are immersed in water, day and night. It is certain that from bathing sin even is not dissipated because people who are in the habit of making pilgrimages are full of love, hatred, &c.

Thus in the course of five short verses, Āryadēva denounces the uselessness not only of bathing in the Ganges but of all bathings and pilgrimages. They are not only incapable of conferring merit but are also incapable of dissipating sin.

The ninth verse of the MS. corresponds to the first verse of the Dhammapada in Pali but the Pali verse has six caraṇas while my verse has four only. The last letter of the second caraṇa is *manōjavāḥ* in my MS. while in Pali it is *manōmayā*.

The work appears to be a complete one as at the end Āryadēva says:

चित्तविशुद्धिमाधाय यन्मयोपार्ज्जितं शुभम् ।
चित्तविशुद्धिमाधाय तेनास्तु सुखिनो जनाः ।



Let people be happy by making their hearts pure by the merit which I have acquired by making my heart pure.

Then comes the colophon; after the colophon we have the name of the scribe and then a portion of the well-known formula यथात्मनः प्रियाः प्राणाः सर्व्वेषां प्राणिनां तथा । The writer apparently had no space in the leaf to complete the couplet and at first sight I could not make out that the work came to an end there.

(म)हायाने सुविस्पष्टमुक्तमेतत् सुविस्तरम् ॥ ६ ॥
धर्म्मपुद्गलनैरात्म्याच्चित्तमात्रं जगौ मुनिः ।
ततोऽपि सर्व्वमुत्पन्नं गमकं सुनिराकुलम् ॥ ७ ॥
भावग्रहप्रभावेण(प्रहावेण) गृहीतान् प्रति चोदितम् ।
आगमेऽपि हि सुव्यक्तं विस्तरं करुणात्मना ॥ ८ ॥
मनःपूर्व्वङ्गमा धर्म्मा मनः श्रेष्ठं मनोजवाः ।
मनसा च प्रदुष्टेन भाषते वा करोति वा ॥ ९ ॥
स्वपिता भिक्षुणादिष्टः शीघ्रं गच्छति प्रेरितम् ।
आयुष्य च मृते तस्मिन्नानन्तर्य्येण गृह्यते ॥ १० ॥
स्वग्लानेनार्हतादिष्टः स्वगलं परिपीडितम् ।
उपस्थायकभिक्षुः स मृते तस्मिन्न दोषभाक् ॥ ११ ॥
अन्यसङ्गीनि चाल्यन्तु मारयन् दोषमश्नुते ।
इत्युक्तं विनये व्यक्तं न दोषो ऽदुष्टचेतसाम् ॥ १२ ॥
न स्तूपखलणे दोषस्तत्संस्कारधिया मतम् ।
केवलं पुण्यराशिः स्यादुखानन्तर्य्यकारिणाम् ॥ १३ ॥
उपानयुगलं दत्वा मुनेर्मूर्द्धि शुभाशयात् ।
अपनीय तथा चान्यं राज्यं फलमवाप्नुतः ॥ १४ ॥
तस्मादाश्रयमूला हि पापकर्म्मव्यवस्थितिः ।
इत्युक्तमागमे यस्मात् नापत्तिः शुभचेतसाम् ॥ १५ ॥
स्वाधिदेवतयोगात्मा जगदर्थकृतोद्यमः ।
भुञ्जानो विषयान् योगान्मुच्यते न चलिष्यति ॥ १६ ॥
यथैव विषतत्वज्ञो विषमालोक्य भक्षयन् ।
केवलं मुच्यते नासौ रोगमुक्तश्च जायते ॥ १७ ॥
मायामरीचि-गन्धर्व्वनगर-स्वप्नसन्निभम् ।
जगत्सर्व्वं समालोक्य किं कथं केन भुज्यते ॥ १८ ॥

* 19th verse is not in the MS.

बाला मज्जन्ति रूपेषु वैराग्यं यान्ति मध्यमाः ।
स्वभावज्ञा विमुच्यन्ते रूपस्योत्तमबुद्धयः ॥ २० ॥
विचिन्त्य समयं सर्व्वं देवतापूजनाविधिम् ।
शुद्धमालोक्य निःशङ्कं भोक्तव्यं मन्त्रचोदितम् ॥ २१ ॥
शोष्यं बोध्यं तथा दीप्यं अङ्गुरत्नययोगतः ।
अनामाङ्गुष्ठवक्त्राभ्यां प्रीणयेच्च तथागतान् ॥ २२ ॥
यत् सत्यमिति बालानां तन्मिथ्या खलु योगिनाम् ।
कायेनैव तु सम्प्राप्तं न बद्धो न च मुच्यते ॥ २३ ॥
संसारं चैव निर्व्वाणं मन्यन्ते तत्त्वदर्शिनः ।
न संसारं न निर्व्वाणं मन्यन्ते तत्त्वदर्शिनः ॥ २४ ॥
विकल्पो हि महाग्राहः संसारोदधिपाटकः ।
अविकल्पा महात्मानो मुच्यन्ते भवबन्धनात् ॥ २५ ॥
शङ्काविषेण बाध्यन्ते विषेणैव पृथक्जनाः ।
तामेवोत्खाल्य निर्मूलं विचरेत् करुणात्मकः ॥ २६ ॥
यथैकः स्फटिकः स्वच्छः पररागेण रज्यते ।
तथैव चित्तरत्नन्तु कल्पनारागरञ्जितम् ॥ २७ ॥
प्रकृते कल्पनारागैर्विविक्तं चित्तरत्नकम् ।
आदिशुद्धमनुत्पन्नं निजरूपमनाविलम् ॥ २८ ॥
तत्तद्यत्नेन कर्त्तव्यं यद्यद्बालविगर्हितम् ।
स्वाधिदैवतयोगेन चित्तनिर्म्मलकारिणा ॥ २९ ॥
रागाग्निविषसंयुक्ता योगिनां शुद्धचेतसा ।
कामिताः खलु कामिन्यः कामामोक्षफलावहाः ॥ ३० ॥
यथा स्वगरुडं ध्यात्वा गारुडिको विषं पिवन् ।
करोति हि विषं साध्यं न विषेणाभिभूयते ॥ ३१ ॥
द्वादशयोजनव्यासं चक्रं वै शिरसि भ्रमन् ।
बोधिचित्तमनुत्पाद्य आपनीतमिति श्रुतिः ॥ ३२ ॥
बोधिचित्तं समुत्पाद्य सम्बोधौ कृतचेतसा ।
तन्नास्ति यन्न कर्त्तव्यं जगदुद्धरणाशया ॥ ३३ ॥
आदिशुद्धमनुत्पन्नं निःस्वभावमनाविलम् ।
जगत् भावेन संपश्यन्न बद्धो न च मुच्यते ॥ ३४ ॥



विचिन्त्य विधिवद्योगी देवतागुणविस्तरम् ।
रागयेत् रागचित्तेन रज्यते न च मुच्यते ॥ ३५ ॥
किं कुर्म्मः कलया लभ्या विचित्रा भावशक्तयः ।
विषाज्ज्ञा(घ्रा)तो यथा कश्चिद्विषेणैव तु निर्विषः ॥ ३६ ॥
कर्णाज्जलं जलेनैव कण्टकेनैव कण्टकम् ।
रागेणैव तथा रागमुद्धरन्ति मनीषिणः ॥ ३७ ॥
यथैव रजको वस्त्रं मलेनैव तु निर्म्मलम् ।
कुर्य्याद्विज्ञस्तथात्मानं मलेनैव तु निर्म्मलम् ॥ ३८ ॥
यथा भवति संशुद्धो रजोनिघृष्टदर्पणः ।
सेवितस्तु तथा विज्ञैर्दोषाद्दोषविनाशनः ॥ ३९ ॥
लोहपिण्डो जले क्षिप्तो मज्जत्येव तु केवलम् ।
पात्रीकृतं तदेवान्यं तारयेत् तरति स्वयम् ॥ ४० ॥
तद्वत् पात्रीकृतं चित्तं प्रज्ञोपायविधानतः ।
भुञ्जानो मुच्यते कामं मोचयत्यपरानपि ॥ ४१ ॥
दुर्विज्ञैः सेवितः कामः कामो भवति बन्धनम् ।
स एव सेवितो विज्ञैः कामो मोक्षप्रसाधकः ॥ ४२ ॥
प्रसिद्धं सहसालोक्य क्षारं विषविनाशनम् ।
तदेव फणिभिः पीतं सुतरां विषवर्द्धनम् ॥ ४३ ॥
जले क्षीरं यथाविष्टं हंसः पिवति पण्डितः ।
सविषान् विषयांस्तद्वद्भुक्तमुक्तश्च पण्डितः ॥ ४४ ॥
यथैव विधिवद्भुक्तं विषमप्यमृतायते ।
दुर्भुक्तं घृतपूरादि बालानान्तु विषायते ॥ ४५ ॥
इदमेव हि यच्चित्तं शोधितं हेतुभिः शुभैः ।
निर्विकल्पं निरालम्बं भाति प्रकृतिनिर्मलम् ॥ ४६ ॥
यथा वह्निः कृशोऽप्येष तैलवृत्त्यादिसंस्कृतः ।
दीपो निर्मलनिष्कम्पः स्थिरस्तिमिरनाशनः ॥ ४७ ॥
वटवीजं यथा सूक्ष्मं सहकारसमन्वितं ।
शाखा-मूल-फलोपेतं महावृक्षविधायकं ॥ ४८ ॥
हरिद्राचूर्णसंयोगाद्वर्णान्तरमिति स्मृतं ।
प्रज्ञोपायसमायोगाद्धर्म्मधातुं तथा विदुः ॥ ४९ ॥

घृतञ्च मधुसंयुक्तं समांसं विषतां व्रजेत् ।
तदेव विधिवद्भुक्तमुत्कृष्टन्तु रसायनं ॥ ५० ॥
रसस्पृष्टं यथा ताम्रं निर्दोषकाञ्चनं व्रजेत् ।
ज्ञानवृद्धास्तथा क्लेशाः क्लेशाः कल्याणकारकाः ॥ ५१ ॥
हीनयानाभिरूढ़ानां मृत्युशङ्का पदेपदे ।
संग्रामजयतुन्तेन (स्तु तेषां) दूर एव व्यवस्थितः ॥ ५२ ॥
महायानाभिरूढस्तु करुणाधर्म्मवर्म्मितः ।
कृपानयधनुर्वाणो जगदुद्धरणाशयः ॥ ५३ ॥
महासत्त्वो महोपायः स्थिरबुद्धिरतन्द्रितः ।
जित्वा दुस्तरसंग्रामं तारयन्त्यपरानपि ॥ ५४ ॥
पशवोऽपि हि क्लिश्यन्ते स्वार्थमात्रपरायणाः ।
जगदर्थविधातारो धन्यास्ते विरला जनाः ॥ ५५ ॥
शीतवातादिदुःखानि सहन्ते स्वार्थलम्पटाः ।
जगदर्थप्रवृत्तास्ते न सहन्ते कथं नु ते ॥ ५६ ॥
नारकाण्यपि दुःखानि सोढव्यानि कृपालुभिः ।
शीतवातादिदुःखानि कस्तान्यपि विचारयेत् ॥ ५७ ॥
नानिष्टकल्पनां कुर्य्यान्नोपवासं न च क्रियाम् ।
स्नानशौचं न चैवात्र ग्रामधर्म्मं विवर्ज्जयेत् ॥ ५८ ॥
नखदन्तास्थिमज्जानः पितुः शुक्रविकारजाः ।
मांसशोणितकेशादि मातृशोणितसम्भवम् ॥ ५९ ॥
इत्थमशुचिसम्भूतः पिण्डो ह्यशुचिपूरितः ।
कथं सन् तादृशः कायो गङ्गास्नानेन शुध्यति ॥ ६० ॥
न ह्यशुचिघटस्तोयैः क्षालितोऽपि पुनः पुनः ।
तद्वदशुचिसम्पूर्णः पिण्डोऽपि न विशुध्यति ॥ ६१ ॥
प्रतरन्नपि गङ्गायां नैव श्वा शुद्धिमर्हति ।
तस्माद्धर्म्मधियां पुंसां तीर्थस्नानन्तु निष्फलम् ॥ ६२ ॥
धर्म्मो यदि भवेत् स्नानात् कैवर्त्तानां कृतार्थता ।
नक्तन्दिवं प्रविष्टानां मत्स्यादीनान्तु का कथा ॥ ६३ ॥
पापक्षयोऽपि स्नानेन नैव स्यादिति निश्चयः ।
यतो रागादिबुद्धिस्तु दृश्यते तीर्थसेविनाम् ॥ ६४ ॥



रागो द्वेषश्च मोहश्च ईर्ष्या तृष्णा च सर्व्वदा ।
पापानां मूलमाख्यातं नैषां स्नानेन शोधनम् ॥ ६५ ॥
आत्मात्मीयग्रहादेते सम्भवन्तीह जन्मिनाम् ।
अविद्याहेतुकः सोऽपि अविद्या भ्रान्तिरिष्यते ॥ ६६ ॥
रौप्यबुद्धिर्यथा शुक्तौ शुक्तिदृष्टे निवर्त्तते ।
नैरात्म्यदर्शनात् सापि निर्मूलमवसीदति ॥ ६७ ॥
सर्पबुद्धिर्यथा रज्जौ रज्जुदृष्टे निवर्त्तते ।
सर्पबुद्धिः पुनस्तत्र नैव स्यादिह जन्मनि ॥ ६८ ॥
सत्यबुद्धिस्तथाऽत्रापि वज्रज्ञानान्निवर्त्तते ।
न भूयः सम्भवेत्तत्र दग्धवीज इवाङ्कुरः ॥ ६९ ॥
नैरात्म्यशुचिसंसृष्टः पिण्डः प्रकृतिनिर्म्मलः ।
तस्य सन्तापने धर्म्मः कथं बालैर्विकल्पितः ॥ ७० ॥
चन्द्रोदयव्ययश्चापि अपक्षतिथिकल्पना ।
सूर्य्योदयव्ययेनापि दिवारात्रिव्यवस्थितिः ॥ ७१ ॥
पूर्व्वादिव्यवहाराख्यः शब्दत्रयविकल्पना ।
वारनक्षत्रराश्यादि सर्व्वलोका विकल्पितम् ॥ ७२ ॥
शीतोष्णावर्षणापेक्षं तथैवमृतुकल्पना ।
स्वकर्म्मफलभोगोऽयं शुभाशुभग्रहादितः ॥ ७३ ॥
अविद्याकर्द्दमालिप्तं चित्तचिन्तामणिः पुमान् ।
प्रवृत्तः क्षालितुं विद्वान् कोऽविद्यां वृंहयेत्पुनः ॥ ७४ ॥
न वारतिथिनक्षत्रदेशकालाद्यपेक्षणात् ।
विहरन्निर्विकल्पस्तु निर्निमित्तमशङ्कितः ॥ ७५ ॥
यद्यदिन्द्रियमार्गत्वं यायात्तत्तत् स्वभावतः ।
सुसमाहितयोगेन सर्व्वबुद्धमयं वहेत् ॥ ७६ ॥
चक्षुर्विरोचनो बुद्धः श्रवणो वज्रशून्यकः ।
घ्राणश्च परमाद्यैस्तु पद्मनर्त्तेश्वरो मुखम् ॥ ७७ ॥
कायः श्रीहेरुको राजा वज्रसत्त्वश्च मानसम् ।
एवं सम्यक् यदा योगी विचरेत् करुणात्मकः ॥ ७८ ॥
सिद्धान्तो निर्विकल्पोऽसौ स्थिरकल्पस्तु धीधनः ।
यथेष्टचेष्टाव्याहारी सर्व्वभुक् सर्व्वकृत्तथा ॥ ७९ ॥

सर्व्वकामक्रियाकारी यथा रुचिरचेष्टितम् ।
उत्थितो वा निषण्णो वा चंक्रमो वा स्वयन्तथा ॥ ८० ॥
अमण्डलप्रविष्टो वा सर्व्वावरणवानपि ।
स्वाधिदैवतयोगात्मा मन्दपुण्योऽपि सिध्यति ॥ ८१ ॥
अनेन सर्व्वसौरित्वं सर्व्वबुद्धत्वमेव च ।
जन्मनीहैव तत्त्वज्ञः संप्राप्नोति न संशयः ॥ ८२ ॥
यथा प्राकृतको लोको योगिलोकेन बाध्यते ।
बाध्यन्ते धीविशेषेण योगिनोऽप्युत्तरोत्तरैः ॥ ८३ ॥
महाप्रज्ञा महोपाया महाकृपाधिमोक्षतः ॥
महायानसमुद्दिष्टं महासत्त्वस्य गोचरम् ॥ ८४ ॥
यत्कल्पनामसंख्यायै न प्राप्तं बहुभिर्मतैः ।
जन्मन्यत्रैव बुद्धत्वं प्राप्यते न च संशयः ॥ ८५ ॥
महायानस्य माहात्म्यात् पुण्यज्ञानस्य सम्भवः ।
सर्व्वज्ञत्वपदं रम्यं सद्यो जन्मनि लभ्यते ॥ ८६ ॥
आगमश्रुतिचिन्ता तु महायाने तु गृह्यते ।
आशयानुशयाभेदाद्यानभेदः प्रकाश्यते ॥ ८७ ॥
अन्यत्र बोधिमोक्षोऽयमन्यथा बोधिचारिका ॥
अन्या चित्तविशुद्धिश्च फलमन्यदिहोच्यते ॥ ८८ ॥
समीपं निर्मलादर्शे चिरं निर्मलचक्षुषः ।
यथा भाति सुविस्पष्टं स्वच्छप्रकृतिनिर्मलम् ॥ ८९ ॥
विधूतकल्पनाजालं विस्पष्टशुद्धचेतसा ।
योगिनाश्च तथा ज्ञानं प्रज्ञानिर्मलदर्पणैः ॥ ९० ॥
सूर्य्यकान्तसमाश्लिष्टसूर्य्यकान्तमणौ यथा ।
सहसा प्रज्वलत्यग्निः समर्थः स्वार्थसाधने ॥ ९१ ॥
अपास्तकल्पनाजालं सूर्य्यकान्तनिभं मनः ।
प्रज्ञासूर्य्यांशुसंश्लिष्टं तद्वज्ज्वलति योगिनाम् ॥ ९२ ॥
काष्ठद्वयनिघर्षेण यथा ज्वलति पावकः ।
आदिमध्यान्तसंशुद्धः स वै वस्तुप्रसाधकः ॥ ९३ ॥
प्रज्ञोपायसमायोगाद्योगाद् ज्ञानं तथा विदुः ।
यथैवैकप्रदीपोऽयं वर्त्यन्तरसमाश्रितः ॥ ९४ ॥



यथा स्थानं यथा स्वार्थं करोत्युच्चैः प्रकाशनम् ।
नानाधिमुक्तिसत्त्वानां यथाकृत्यमनुष्ठयेत् ॥ ९५ ॥
निर्दोषं शीतलं हृद्यं सर्व्वव्याधिविनाशनम् ।
प्रज्ञाक्षीरमहोपायचिरत्नमथनोत्थितम् ॥ ९६ ॥
स्फुरणानन्तमूर्त्तिस्तु प्रज्ञोपायविभावनैः ।
विधिज्ञो हि यथा कश्चित् क्षीरादमृतमुद्धरेत् ॥ ९७ ॥
विशुद्धधर्म्मधातुः स शुभाशुभविनाशनः ।
यथा लतासमुद्भूतं फलपुष्पसमन्वितम् ॥ ९८ ॥
यथैकक्षणसंबोधिः संभारद्वयसंयुता ।
... ... ... ... धर्षणाकर्षणादिकम् ॥ ९९ ॥
मद्यमांसरतो योगी कुर्व्वनप्युपलभ्यते ।
... ... ... ... मादर्शः समीक्ष्यते ॥ १०० ॥
महायाने यतोऽद्यापि मन्त्रसामर्थ्यदर्शनात् ।
मातृदुहितृसम्बन्ध ... ... ... ... ... ॥ १०१ ॥
... ... ... ... ... जगदाह तथागतः ।
पञ्च बुद्धात्मकं शुक्रं शोणितञ्चापि तादृशम् ॥ १०२ ॥
तन्मयः खलु पिण्डोऽयं को विप्रः कश्च वान्त्यजः ।
... ... ... सर्व्वं शरीरं खलु भिक्षवः ॥ १०३ ॥
अनित्यं दुःखशून्यञ्च न जातिर्न च जातिवान् ।
कैवर्त्तीगर्भसम्भूतः कश्चिच्च ... ... ... ... ॥ १०४ ॥
चित्तं यथा सुखं ध्यायन् सम्बुद्धोऽयमनागतः ।
सर्व्वकामोपभोगोऽस्तु रमथ मुक्ततोऽभयात् ॥ ११२ ॥
मा भैष्टा नास्ति वः पापं समयो दुरतिक्रमः ।
मन्त्रसंस्कृतकाष्ठादि देवत्वमधिगच्छति ॥ ११३ ॥
किं पुनः ज्ञानवान् कायः कार्य्यमोहविचेष्टितम् ।
प्राकृतत्वमहङ्कारं परित्यज्य समाहितः ॥ २१४ ॥
प्रज्ञोपायविधानेन क्रियामिमाङ्गमाचरेत् ।
पङ्कजातं यथा पद्मं पङ्कदोषैर्न लिप्यते ॥ ११५ ॥
विकल्पवासनादोषैस्तथा योगी न लिप्यते ।
अनादिवासनापङ्कैर्विलिप्तं चित्तरत्नकम् ॥ ११६ ॥
प्रज्ञोपायजलेनैव ... ... ... ... ... ।
स्वाधिदैवतयोगस्य स्थिरचित्तस्य धीमतः ॥ ११७ ॥

मुक्तः कुदृष्टिमेघैश्च भासते चित्तभास्करः ।
.. .. .. .. सहसा कल्पना घटे ॥ ११८ ॥
प्रकृत्या निर्मलः स्वच्छो ज्ञानदीपः प्रकाशते ।
सुप्रसिद्धानि भूतानि क्षित्यग्निजलवायवः ॥ ११९ ॥
क्रियन्ते ह्यन्यथा विज्ञैर्मन्त्रसामर्थ्ययोगतः ।
सर्व्ववादपरित्यज्य ... ... समाचरेत् ॥ १२० ॥
यस्य मन्त्रस्य सामर्थ्यं सूक्ष्मदेवोऽपि सिध्यति ।
स्त्रीरत्नं न परित्याज्यं बोधिचित्तं तथा गुरुम् ॥ १२१ ॥
न ह्यात्मा प्राणिनः केऽपि समयानप्यधिष्ठयेत् ।
महारत्नं सकर्पूरं रक्तचन्दनयोजितम् ॥ १२२ ॥
अलिवज्रादिकश्चैव पश्चैतानप्यधिष्ठयेत् ।
अन्यैश्च समयैर्द्रव्यैश्चित्तस्योत्कर्षकारकैः ॥ १२३ ॥
मारुतक्षोभशान्त्यर्थं प्रीणयेच्चित्तवज्रिणम् ।
मक्षिकापदमात्रेण विषेणाप्यभिभूयते ॥ १२४ ॥
अणुमात्रां घृणां लज्जां दूरतः परिवर्ज्जयेत् ।
आन्तरालिकभावस्तु व्यर्थो वै पतनं यथा ॥ १२५ ॥
गुरोराज्ञाञ्च मुद्राञ्च छायामपि न लङ्घयेत् ।
गुणास्तस्य परं ग्राह्यं दोषा नैव कदाचन ॥ १२६ ॥
भ्ययुद्धं(?) वाचरं विज्ञाः स्वपरायतनमेव वा ।
आचार्य्यः परमो देवः पूजनीयः प्रयत्नतः ।
स्वयं वज्रधरो राजा साक्षाद्रूपेण संस्थितः ॥ १२७ ॥
यथोदकमणिः सम्यक् कलुषोदकशोषकः ।
सद्धर्म्माणस्तथा प्रोक्ताश्चित्तरत्नविशोधकः ॥ १२८ ॥
शर्धावान् पूज्यते क्वापि प्रज्ञाचक्षुविवर्ज्जितः ।
उत्पादयेदतः प्रज्ञामागमाधिगमात्मिकाम् ॥ १२९ ॥
श्राद्धो बहुश्रुतः प्राज्ञो प्रकृत्या करुणात्मकः ।
जगद्दुःखविनाशाय सुखोपायं स विन्दति ॥ १३० ॥
चित्तविशुद्धिमाधाय यन्मयोपार्ज्जितं शुभं ।
चित्तविशुद्धिमाधाय तेनास्तु सुखिनो जनाः ॥
कृतिरियमार्य्यदेवपादानामिति ॥
स्वपरार्थहेतुना स्वात्र हरितक्लेति शुभं मये लिखितम् ।
यथात्मानः प्रियाः प्राणाः सर्व्वेषां प्राणिनान्तथा ।



## *Note on a Dialect of Gujarātī discovered in the District of Midnapur.*—By

GEORGE A. GRIERSON, C.I.E., PH.D., I.C.S.

[Read July, 1898.]

Several interesting facts have come to light during the progress of the Linguistic Survey. Amongst them may be mentioned the discovery of a number of people who speak a dialect of Gujarātī in the Dāntan thānā of the Bengal District of Midnapur.

Amongst the languages returned to me as spoken in that District was Siyālgirī. The Siyālgirs are a criminal, nomadic tribe, numbering about 120 souls, who have a language of their own. They are not mentioned by Dalton or by Mr. Risley in their Ethnographical works. This language was unintelligible to the other inhabitants of the District, and was believed "to resemble Santālī." This was an easy supposition to make, as there are some 118,000 Santālis in the District, whose language is equally unintelligible to the multitude.

In order to obtain materials for the second part of the Survey, specimens of every language spoken in each District are being collected. The specimens are all to consist of translations of the Parable of the Prodigal Son, and in order to assist the preparation of these, books of translations of the parable which had been already made into the principal languages of India have been distributed to the translators. Included in these last was a Gujarātī version. In sending the Siyālgirī version to me, the Collector of Midnapur drew attention to the remarkable points of resemblance between it and the Gujarātī version to which I have just alluded. An examination of the Siyālgirī specimen fully justified the Collector's remarks. The very first sentence is almost pure Gujarātī. The resemblance was so unexpected that I thought it advisable to make further enquiries, so as to make sure that the specimen is a genuine one. There can now be no doubt on that point. The translation had originally been obtained through the kind offices of Babu Krishna Kisor Acharji, the Secretary of the Midnapur District Board, and that gentleman has been good enough to send me the following note on the subject.